श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ द्वादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ द्वादशः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

तथाविधानन्दमहापयोधेः तरङ्गवृत्त्या भजतोऽवतारान्।
अशेषरूपेष्वनुरूपरूपा देवी जगन्नेतुरनुप्रजज्ञे ॥ **12.1** ॥

सा तस्य नित्योदितदिव्यधाम्नः पत्युः प्रिया भानुमतः प्रभेव।
अध्यासितुर्द्वारवतीमदूरात् व्यक्तिं शुभां प्राप विदर्भदेशे ॥ **12.2** ॥

शिखण्डकं निष्प्रतिमं श्रुतीनां शृङ्गारलीलोपमविश्वकृत्यम्।
अधीयते तन्मिथुनं स्वभावात् अन्योन्यजीवातुमनन्यभोग्यम् ॥ **12.3** ॥

दयेव नित्यं दयिता त्रिधाम्नः सर्वेषु भावेषु समानभावा।
परावराणां जननी प्रजानाम् आसीद्विदर्भाधिपतेरपत्यम् ॥ **12.4** ॥

महीतलान्मैथिलसीरकृष्टात् क्षीरोदधेराहितमन्थशैलात्।
भृगूद्वहात्ख्यातिमतश्च याऽभूत् सा भीष्मकादभ्युदियाय भूयः ॥ **12.5** ॥

अमन्यतैनां तनयां स राजा रुक्मश्च मोहादनुजामजन्याम्।
यामेकपत्नीमनघस्य पुंसः प्रजासृजां मातरमामनन्ति ॥ **12.6** ॥

त्यक्त्वापराः स्त्रीर्गुणराशिरेनां शरण्यभूतां शरणं प्रपेदे।
प्रायेण दोषैरविविक्तवासात् भीतः स्वयं भीष्मकराजकन्याम् ॥ **12.7** ॥

आरब्धदेहामिव भागधेयैः अक्षीणि लक्ष्यान्तरतो नियन्त्रीम्।
सुतामिमां प्राप्य सुधामिवान्याम् अमर्त्यकल्पौ पितरावभूताम् ॥ **12.8** ॥

अनन्यवृत्त्या घनतामुपेतैः अप्रौढसूर्येन्दुमयूखजालैः।
सुवर्णरत्नैरथवा प्रक्लृप्तां सुतां सुजाताकृतिमन्वभूताम्॥ **12.9**॥

महीयसीं मङ्गलदीपमालां विद्युत्प्रकाशा विदधे कुमारी।
आकल्परत्नांशु तिरस्करिण्या दीप्त्या रजन्यामपि दीनभासम्॥ **12.10**॥

कलामिवार्धामकठोरधाम्नः पुण्योदयानामिव पूर्वचर्याम्।
प्ररोहवेलामिव कान्तिवल्ल्याः प्रैक्षन्त शुद्धान्तमृगीदृशस्ताम्॥ **12.11**॥

आत्माधिकारादधिकामवस्थां अयत्नतो नूनमवाप्तुकामा।
वार्तानभिज्ञे वयसि स्थितां तां वाग्देवता वन्दिमुखे ववन्दे॥ **12.12**॥

प्रदित्समानेन हरेरभीष्टं कामेन सा कल्पलतेव सृष्टा।
पित्रोरिवानन्यदृशां प्रजानां आशंसया सार्धमवाप वृद्धिम्॥ **12.13**॥

पद्मादिरेखाप्रथमानभूमा निर्धार्यमाणा निगमैरभिज्ञैः।
तदङ्घ्रिविन्याससमिषेण जज्ञे भूमेस्तदा भूषणपङ्क्तिरग्र्या॥ **12.14**॥

अदृश्यभेदैरतिसूक्ष्मभावात् जज्ञे जगन्मङ्गलतां दधानैः।
विहारलौल्याद्विषयेषु तस्या गतेषु वाक्येषु च नृत्तगीतैः॥ **12.15**॥

यदप्सरः पाणिसरोजमुक्तं प्रसूनवर्षं निपपात तस्याम्।
अपूरि तस्यैव रजोभिरग्र्यैः अपांसुला पांसुविहारवाञ्छाम्॥ **12.16**॥

यदृच्छया तत्र परागजालैः यानेव सा केलिगृहानकार्षीत्।
ततः परं त्वष्टुरमी समीची महेन्द्रशालाविधिमातृकाऽभूत्॥ **12.17**॥

चतुर्दशैतानि जगन्ति यस्याः क्षेमाश्रितं क्रीडनकं बभूव।
पर्याप्तलीला मुमुदे तदैषा पाञ्चालिका पञ्जरशारिकाद्यैः॥ **12.18**॥

आस्वादनीयान्यधिकं श्रुतीनां मुग्धाभिजातानि वचांसि तस्याः।
प्रायेण लौल्यादधिकृत्य खिन्ना विधिप्रिया व्याहरतान्य भाषाः॥ **12.19**॥

अविप्लुतव्याकरणानि तस्याः क्रमेण शिक्षानियताक्षराणि।
अनुश्रवाणामनघप्रवृत्तेः आदेशदायीनि वचांस्यभूवन्॥ **12.20** ॥

विभूतयस्तत्र विशाम्पतीनां आत्मीयया देवतयाऽवतीर्णाः।
स्वचिह्नभेदान् परिबर्हयन्त्यः प्रपेदिरे तत्परिवारभावम्॥ **12.21** ॥

वेदालवाले विहितस्थितिं तां रम्यप्रतानामिव रत्नवल्लीम्।
स्तनादिलक्ष्यस्तबकादिचिह्नैः आविष्कृतं यौवनमाविवेश॥ **12.22** ॥

तदीयसर्वाङ्गजुषोरगाधं सौन्दर्यलावण्य सुधास्रवन्त्योः।
ममज्जुरापत्य दृशः सखीनां अन्योन्यसम्भेदमपूर्वतीर्थम्॥ **12.23** ॥

निशेव चन्द्रेण घनव्यपाये नैसर्गिकी बुद्धिरिव श्रुतेन।
फलेन सा नीतिरिवाप्रमादा युक्ता बभौ नूतनयौवनेन॥ **12.24** ॥

आलक्ष्यसंलापलवैरपाङ्गैः अङ्गैरनङ्गोदयपूर्वरङ्गैः।
वियातमुग्धैरपि विभ्रमैः सा विलक्षयामास विभूषणानि॥ **12.25** ॥

अमुक्तकौमारयुवत्वसीम्ना कान्त्या बभौ कल्पितरागभूम्ना।
जरत्पलाश प्रसवानुषक्ता प्रतानिनी पल्लवसम्पदेव॥ **12.26** ॥

प्रसाधनानां परिकर्म दिव्यं विजृम्भणं विभ्रमजालकानाम्।
वयः शुभं वामदृशश्चकाशे पश्यद्दृशां भाग्यमनन्यभोग्यम्॥ **12.27** ॥

अवाप्य सा मुग्धदशामपूर्वाम् अव्याजलीलागतिराबभासे।
रम्या रमोत्पत्तिदशाविशेषात् जाम्बूनदी जङ्गमपद्मिनीव॥ **12.28** ॥

तस्यास्तनुं वर्णयतो ममैवं हीनोपमा दोषपदं न विन्देत्।
निदर्शनं तैरपि नित्यदृष्टं येषां निकर्षोऽपि गुणो यतः स्यात्॥ **12.29** ॥

तारेण तस्याश्चिकुरान्धकारे तारायितं मौक्तिकजालकेन।
प्रायेण योऽसौ प्रलयावसाने निशीथसृष्टेरभवन्निदानम्॥ **12.30** ॥

द्युतिं शिखारत्नसहस्ररश्मेः ज्योत्स्नां च मुक्ताफलजालजाताम्।
तत्कुन्तलश्रेणिमयी तमिस्रमैत्रीं दधौ मन्मथचापमौर्वी॥ **12.31** ॥

मुखाब्जसौन्दर्यमधुद्विरेफाः कान्त्यापगाशैवल पुञ्जकल्पाः।
शोणेन चूडामणिना ससंध्यां तमीमपुष्यन्नलकास्तदीयाः॥ **12.32** ॥

शरत्प्रसन्नेन्दुकलाभिरामा ललाटरेखा सुदृशो रराज।
कामेन तत्कान्तिलतासमृद्ध्यै स्वयं प्रक्लृप्तेव सुधास्रवन्ति॥ **12.33** ॥

कस्तूरिकाक्लृप्तविशेषकं तत् पश्यन् मृगाङ्को वदनं मृगाक्ष्याः।
विभाव्य तादृक्परभागशोभां कलङ्कयुक्तोऽपि जहौ विषादम्॥ **12.34** ॥

तारुण्यनद्यास्तनुवीचिकल्पे तद्भ्रूलते शार्ङ्गनिदानदृश्ये।
अनङ्गवेदप्रणवस्य रत्या लेखाक्षरं न्यस्तमसूचयेताम्॥ **12.35** ॥

प्रसूतपद्मोत्पलकाननश्रीः प्रारब्धवीचीविभवा विलासैः।
दृष्टिस्तदीया ददृशे दयार्द्रा द्राघीयसी मन्मथदीर्घिकेव॥ **12.36** ॥

तद्दृष्टिरायामवती सुजाता श्यामोज्ज्वला चारुविशालमध्या।
मन्ये समेष्यन्मधुवैरिलक्ष्या चेतोभुवः शक्तिरभूदमोघा॥ **12.37** ॥

निगृह्णती रत्नतिलप्रसूनं नासा तदीया नयनाब्धिसेतुः।
अबोधि निश्वाससमीरगन्धैः अन्तर्गतान् वेदगणान् वमन्ती॥ **12.38** ॥

नवेन्दुसंध्याप्रभृतीनि लोके निर्वर्ण्यमानानि निदर्शनानि।
न खल्वविन्दन् कलयापि तस्याः स्मिताधरव्याप्तिकृतामभिख्याम्॥ **12.39** ॥

अहेतुरज्यन्नधरस्तदीयः प्रसूनमुक्तायितमुग्धहासः।
लक्ष्मीलताया ललितोदधेश्च प्रवालयोगं प्रथयाम्बभूव ॥ **12.40** ॥

मुखं तदीयं विरराज मुग्धं सौरभ्यलावण्यसमुच्चयेन।
व्यवस्थितान्योन्यविशेषलोभात् एकत्वमापन्नमिवेन्दुपद्मम् ॥ **12.41** ॥

वर्णानुपूर्वीसुभगेन काले भव्यां श्रुतिं भावयता यथावत्।
तारस्य संस्थानमिवान्वकार्षीत् कण्ठेन सा काञ्चनकम्बुभासा ॥ **12.42** ॥

मधुद्विषः कर्णपरिष्क्रियार्थं कामात्मना माल्यकृतेव कॢप्ते।
बभूवतुर्बाहुलते तदीये शम्पात्विषौ चम्पकमालिके द्वे ॥ **12.43** ॥

आसीदधिष्ठानविशेषसीमा वक्षोजयोरङ्कुरतोरमुष्याः।
मुकुन्दवक्षस्स्थलमुद्रणार्हां भव्यामवस्थामिव भावयन्ती ॥ **12.44** ॥

समावृतौ हारमयूखसूत्रैः तस्याः स्तनौ चारुतरावभूताम्।
जिगीषतस्तत्प्रियचित्तवृत्तिं मनोभुवो मङ्गलपूर्ण कुम्भौ ॥ **12.45** ॥

तस्यास्तदा तद्वदलक्ष्यमध्यं तन्व्याः स्तनद्वन्द्वमवाप वृद्धिम्।
काले यथा तत्प्रथिमप्रभूतं कृच्छ्रादभूत् कृष्णभुजान्तरालम् ॥ **12.46** ॥

मध्यं क्रशिम्ना विरराज तस्या नाभिह्रदान्नालमिव प्ररूढम्।
प्रियागमोदर्कमभूद्यदग्रे कुचात्मना काञ्चनपद्मयुग्मम् ॥ **12.47** ॥

स्तोकानताङ्गी स्तनभारभूम्ना मुग्धा बभौ मुष्टिमितावलग्ना।
भृङ्गाभिनन्ध्येन गुणेन युक्ता कामस्य सा कापि धनुर्लतेव ॥ **12.48** ॥

रराज लावण्यतरङ्गरम्या वलित्रयी मध्यगता मृगाक्ष्याः।
अन्तःस्थितानामिव दर्शयन्ती निवेशसीमान्तमनुश्रवाणाम् ॥ **12.49** ॥

मध्येवलग्नं सुदृशो विलग्ना रोमावली कामधनुर्गुणाभा।
जिगाय नाभीसरसः सुजाताम् उल्लासिनीमुत्पलरेणुपङ्क्तिम् ॥ **12.50** ॥

अनुप्रयातः स्ववशामभिख्यां यूथोज्झितो यौवनगन्धहस्ती।
तद्रोमराजिव्यपदेशदृश्यां नूनं दधौ नूतनदानरेखाम् ॥ **12.51** ॥

प्रकाशितावर्तरुचिः प्रभाब्धौ नाभिः सुवृत्ता रुरुचे नताङ्ग्याः।
रोमावलीरत्नलतानुरूपं रुक्मेण निष्पन्नमिवालवालम् ॥ **12.52** ॥

पृथ्वी चकाशे स्तनसम्पदस्या लावण्यमम्भो नियतं च तेजः।
श्वासोदयो गन्धवहः शुभाङ्ग्याः नाभिश्च मध्यं च नभो विभक्तम् ॥ **12.53** ॥

गजेन्द्रहस्तादिषु तत्समत्वे दूरे सतां दोषगुणावमर्शः।
भविष्यतः शार्ङ्गभृतस्तदूरू लीलोपधाने किमतोऽधिकेन ॥ **12.54** ॥

मनोज्ञवृत्तं मधुबुद्बुदाभं चक्षुष्मतां सादरदर्शनीयम्।
स्वदेहकान्तेः सविशेषदृष्टौ जानुद्वयं दर्पणतामयासीत् ॥ **12.55** ॥

उदेष्यतः पञ्चशरस्य तस्यां उत्पादयिष्यन्नुचितं निषङ्गम्।
विधिः स्वयं मातृकया किलार्थी जङ्घायुगं वीक्ष्य जहर्ष तस्याः ॥ **12.56** ॥

अलक्तकादप्यधिकात्मरागा पदद्वयी पद्मदृशश्चकाशे।
प्राचीनजन्मप्रणयानुरोधात् सम्भाव्यमानेव सरोजलक्ष्म्या ॥ **12.57** ॥

पादाम्बुजे दत्तमधुप्रसक्त्या निर्णेजयामास नखेन्दुकान्त्या।
प्रायेण सा सत्पथमाश्रयन्ती पङ्कानसत्सङ्गभवान्पृथिव्याः ॥ **12.58** ॥

तस्याः पदाम्भोज मृणालभासा प्रकाशभूम्ना नखमौक्तिकानाम्।
प्रकीर्णपुष्पाः सुधयावसिक्ता विहारभूम्यो युगपद्बभूवुः ॥ **12.59** ॥

कलाचिकां काञ्चनसारकॢप्तां कान्तेः शुभां कामपि काहलीं च।
शशङ्किरेऽनन्यसमीक्ष्यशोभां जगन्ति जङ्घामवलोक्य तस्याः ॥ **12.60** ॥

तस्याः श्रुतिश्रेणिशिखामणीनां सकेसरा दीधितिभिर्नखानाम्।
प्रसाधिकालोचनभृङ्गलौल्यं पद्मद्वयी पादमयी निरास ॥ **12.61** ॥

मुखेन्दुनिष्यन्दनिभैरमुष्याः मन्दस्मितैरिन्दुरवाप्तमान्द्यः।
प्रायः प्रभूताद्भुतकान्तिलोभात् नखात्मना तत्पदमेव भेजे ॥ 12.62 ॥

अलक्षि देवैरवतारलक्ष्म्याः तस्याः शुभा पादनखेन्दुपङ्क्तिः।
आगामिकल्पेष्वधिकारलोभात् तारावलिस्तत्पदमाश्रितेव ॥ 12.63 ॥

यातेन मञ्जीररवैश्च तस्याः प्रायः पराभूतगतिप्रणादाः।
शिक्षाविशेषार्थमिवाधिचक्रुः पादानुवृत्तिं प्रणयेन हंसाः ॥ 12.64 ॥

रराज दिव्यैरधिराजचिह्नैः श्लाघापदं तत्पदमागमानाम्।
अश्मानमास्थापयता परस्तात् यत्पाणिना विश्वपतेरवाप्यम् ॥ 12.65 ॥

अतीत्य कृच्छ्रात् समुदायशोभां प्रत्यङ्ग सौन्दर्यपरा दिदृक्षा।
पर्यभ्रमत् प्राप्तविहारडोला पुष्पेषु भृङ्गीव मुहुः सखीनाम् ॥ 12.66 ॥

शृङ्गारयोनेरिव शिल्पविद्यां दिव्यां त्रिलोक्या इव दिष्टवृद्धिम्।
सीमान्तरेखामिव सम्पदस्तां जगुः स्त्रियो जङ्गमरत्नसृष्टिम् ॥ 12.67 ॥

वयस्ययाऽभीष्टवरानुयोगे साऽपश्यदात्मानममन्दलज्जा।
असूचयन्नूनमनेन तस्याः स्वलक्षणं शौरिमनन्यलक्ष्यम् ॥ 12.68 ॥

अलिप्सत श्वेव हविस्तदैनां दैत्यस्वभावो दमघोषजन्मा।
तस्मै च कृष्णैकमनोरथां तां रूपाधिकां दातुमियेष रुक्मी ॥ 12.69 ॥

परस्परं भूषयतः प्रतीकान् औद्वाहिकं मङ्गलमुद्वहन्त्याः।
प्रायः स्वदीप्तेरतिरोधिमिच्छन्त्यावारयन्नाभरणानि तस्याः ॥ 12.70 ॥

लावण्यकल्पद्रुममञ्जरीं तां शृङ्गारदिग्वारणवैजयन्तीम्।
सौन्दर्यदुग्धोदसुधाप्रसूतिं सैरन्ध्रिकाः प्रेक्ष्य मिथः शशंसुः ॥ 12.71 ॥

व्यामातिरिक्तस्तनकुम्भभूम्ना व्याप्ताकृतिं यौवनकुञ्जरेण।
प्रसाधयन्त्यः पतिदेवतास्तां नाथोचितां प्रेक्ष्य न तृप्तिमापुः ॥ 12.72 ॥

मौलौ सुकेश्याः स्फुटरश्मिजालं मुक्तामयं जालकमाबबन्धुः।
क्रीडोचितं कृष्णमृगं गृहीतुं तेन स्मरो वागुरिकस्तदाऽभूत्॥ **12.73**॥

अनन्यदृष्टिं विततान तामप्यादर्शसङ्क्रान्ति विशेषदृश्यम्।
प्रसाधनैः प्राप्तगुणैः प्रतीक्ष्यं तस्या मुखं तामरसायताक्षम्॥ **12.74**॥

अंसावलम्बिन्यसितेक्षणायाः कम्पोज्ज्वला काचन रत्नमाला।
अलक्ष्यतोल्लासितरम्यरश्मिः कामार्पिता कान्तिविहारडोला॥ **12.75**॥

रराज मुक्ताभिरवाप्तफेनं रत्नाङ्गदं प्राप्तगुणं तदङ्गे।
प्रवाहवृत्तेः परिवृत्तिभेदान् महीयसी मण्डलितेव कान्तिः॥ **12.76**॥

अभासतात्मस्मितसौम्यभासा हारेण हृद्येन जगत्प्रतीक्ष्या।
प्रियस्य चन्द्रं हृदयाद्विधातुः प्राप्तानुसारेव निसर्गशुद्धम्॥ **12.77**॥

मनुष्यताकञ्चुकितात्मभूम्नः काले चकाशे कुचकञ्चुकश्रीः।
रत्नाचले भोगिशयप्रियायाः स्वतल्पनिर्मोक इवावलीनः॥ **12.78**॥

आदर्शबिम्बेन तदङ्गकान्तेः अक्षाम्यता निष्प्रतिमत्ववादम्।
प्रतिप्रवृत्तिं प्रतिमां विधाय प्रख्यापिता वृत्तवतामपीर्ष्या॥ **12.79**॥

अभिन्नरूपामनुवेलभिन्नात् प्रसाधनादभ्यधिकां प्रसत्तिम्।
विलोकयन्ती जनता तदीयां व्यावर्तयामास ततो न दृष्टिम्॥ **12.80**॥

मुखेन्दुलावण्यसुधाप्रवाहे मुहुः प्रतीपप्लवनोद्यतेन।
तत्कर्णभूषामकरेण मन्ये मन्दीकृता मन्मथलाञ्छनश्रीः॥ **12.81**॥

प्रभाप्रवाहोदितसैकताभे स्तनद्वये तामरसेक्षणायाः।
तत्कंधराशङ्खमतल्लिकायाः प्रसूतिराशङ्क्यत हारवृत्त्या॥ **12.82**॥

स्वभावजादभ्यधिकं तदङ्गेष्वासादितं सौरभमङ्गरागैः।
स सर्वगन्धोऽपि यदन्वयेन प्रभूतमामोदविशेषमृच्छेत्॥ **12.83**॥

प्रतिक्रियामात्मतिरस्क्रियायाः प्रायः स्वयं व्यापृतया विधातुम्।
तदङ्गयोगोज्ज्वलरत्नधाम्ना सञ्छादितं मेखलयाऽन्तरीयम्॥ **12.84** ॥

शिखण्डकानि श्रुतिसुन्दरीणां चारूणि पादाभरणानि तस्याः।
पदेषु सङ्घर्षवशादिवासन् मिथः पुरोभागिपदास्पदानि॥ **12.85** ॥

अनुक्षणं बन्धुजनैरमुष्यां आमुच्यमानेषु विभूषणेषु।
अयत्नतस्तानि तदन्तराले कृतास्पदा केवलताऽत्यशेत॥ **12.86** ॥

निनीषतां देवगृहं यथैताम् आकल्पलक्ष्म्या समयोजयन्त।
मुकुन्दसंस्पर्शमवाप्तुमर्हा सैव स्थिरा धन्यतमा बभूव॥ **12.87** ॥

पतिव्रताः पार्थिवयोषितस्तां प्रत्यङ्गसौन्दर्यनिमग्नभावाः।
कृताशिषः कृष्णमनोरथस्यां आरोप्य कर्णीरथमन्वगच्छन्॥ **12.88** ॥

मङ्गल्यसङ्गीतसमेतयात्रा मनुष्यदेवीभिरनुद्रुता सा।
निनंसितैषा स्वयमेव देवी नान्येति सद्भिर्निरणायि नाथा॥ **12.89** ॥

भावान्तरेषु प्रतिपन्नलीला पैतामहादीनि पदानि दातुम्।
स्वदत्तशक्तेः कुहनामनुष्या कुतश्चिदिष्टं स्वयमाशशंसे॥ **12.90** ॥

प्रणम्य मूर्ध्ना निहितोपहाराम् उत्तस्थुषीमुत्सवदेवतैनाम्।
अवोचदारादशरीरिवाचा परैरजय्यं पतिमाप्नुहीति॥ **12.91** ॥

पत्या निजेन परिणीतिमवाप्तुकामा
    लब्ध्वा वरं ललितमुत्सवदेवतायाः।
तेनैव सा समसमीहितसिद्धिरासीत्
    मानाधिका जगति मन्मथमन्मथेन॥ **12.92** ॥

ऊरुः सव्यो नयनकमलं भ्रूलता चापि तस्याः
    प्रावेपन्त प्रियमुपगतं सूचयन्ति स्ववृत्त्या।

आरादासीदलघुतुलसीगन्धसौम्यः समीरः
प्रत्यासन्नं मुहुरुदचरत्पाञ्चजन्यप्रणादः ॥ **12.93** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये द्वादशः सर्गः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥